श्रीः

# देवीमाहात्म्यम्

पूर्वाङ्गत्रयेण रहस्यत्रयेण
च समलङ्कृतम्

2012-07-26

# विषयानुक्रमणिका


आहुतिमीमांसा........................................ 4
सङ्कल्पः........................................ 5
कवचम्........................................ 5
अर्गला........................................ 13
कीलकम्........................................ 16
रात्रीसूक्तम्........................................ 19
नवार्णजपः ........................................ 21
सप्तशतीन्यासः........................................ 23
पूर्वपीठिका ........................................ 25
प्रथमचरित्रम्........................................ 25
प्रथमोऽध्यायः ........................................ 26
मध्यमचरित्रम्........................................ 37
द्वितीयोऽध्यायः........................................ 37
तृतीयोऽध्यायः........................................ 46
चतुर्थोऽध्यायः ........................................ 52
उत्तरचरित्रम्........................................ 61
पञ्चमोऽध्यायः ........................................ 61
षष्ठोऽध्यायः........................................ 72
सप्तमोऽध्यायः ........................................ 75
अष्टमोऽध्यायः........................................ 79
नवमोऽध्यायः........................................ 87
दशमोऽध्यायः ........................................ 92
एकादशोऽध्यायः ........................................ 96

द्वादशोऽध्यायः.......................................................... 105
त्रयोदशोऽध्यायः ....................................................... 110
प्राधानिकं रहस्यम् ................................................... 114
वैकृतिकं रहस्यम्....................................................... 118
मूर्तिरहस्यम् ............................................................ 123
क्षमाप्रार्थना ............................................................ 127
आरात्रिकम्............................................................... 128
आपदुन्मूलनस्तोत्रम्................................................. 129

# आहुतिमीमांसा

| अ० | विषयः | उवाचाः | श्लोकाः | अर्ध० | आहत्य |
|---|---|---|---|---|---|
| १ | मधुकैटभवधः | १४ | ७७ | २ | ९३ |
| २ | महिषासुरसैन्यवधः | १ | ६७ | २ | ७० |
| ३ | महिषासुरवधः | ३ | ४१ | ० | ४४ |
| ४ | शुक्रादिस्तुतिः | ५ | ३६ | १ | ४२ |
| ५ | देव्या दूतसंवादः | ९ | ७६ | ४४ | १२९ |
| ६ | धूम्रलोचनवधः | ४ | २० | ० | २४ |
| ७ | चण्डमुण्डवधः | २ | २५ | ० | २७ |
| ८ | रक्तबीजवधः | १ | ६१ | १ | ६३ |
| ९ | निशुम्भवधः | २ | ३९ | ० | ४१ |
| १० | शुम्भवधः | ४ | २७ | १ | ३२ |
| ११ | देव्याः स्तुतिः | ४ | ५० | १ | ५५ |
| १२ | फलस्तुतिः | २ | ३७ | २ | ४१ |
| १३ | वरप्रदानम् | ६ | १७ | १ | २४ |
| | -- | ५७ | ५७३ | ५५ | ६८५ |

दिनत्रये

| दिनम् | अध्यायाः | श्लोकाः |
|---|---|---|
| १ | १ | ७७ |
| २ | २-४ | १४४ |
| ३ | ५-१३ | ३५२ |

दिनसप्तके

| दिनम् | अध्यायाः | श्लोकाः |
|---|---|---|
| १ | १ | ७७ |
| २ | २-३ | १०८ |
| ३ | ४ | ३६ |
| ४ | ५-८ | १८२ |
| ५ | ९-१० | ६६ |
| ६ | ११ | ५० |
| ७ | १२-१३ | ५४ |

# सङ्कल्पः

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये
ॐ भूः + भुव॒ःसुव॒रोम्

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं
श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रसादसिद्ध्यर्थं
(त्र्याङ्गपारायणपूर्वकं) श्रीदेवीमाहात्म्यपारायणं करिष्ये

# कवचम्

अस्य श्रीचण्डीकवचस्य, ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, चामुण्डा देवता, अङ्गन्यासोक्तमातरो बीजम्, दिग्बन्धदेवतास्तत्वम्, श्रीजगदम्बाप्रीत्यर्थे सप्तशतीपाठाङ्गत्वेन जपे विनियोगः॥

ॐ नमश्चण्डिकायै

मार्कण्डेय उवाच –
यद् गुह्यं परमं लोके सर्वरक्षाकरं नृणाम्
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह 1

ब्रह्मोवाच –

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम्
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने 2

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् 3

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च
सप्तमं कालरात्रीति महागौरीति चाष्टमम् 4

नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना 5

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे
विषमे दुर्गमे चैव भयार्ताः शरणं गताः 6

न तेषां जायते किञ्चिदशुभं रणसङ्कटे
नापदं तस्य पश्यामि शोकदुःखभयं न हि 7

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः 8

प्रेतसंस्था तु चामुण्डा वाराही महिषासना
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना 9

माहेश्वरी वृषारूढा कौमारी शिखिवाहना
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया 10

श्वेतरूपधरा देवी ईश्वरी वृषवाहना
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता 11

इत्येता मातरः सर्वाः सर्वयोगसमन्विताः
नानाभरणशोभाढ्या नानारत्नोपशोभिताः 12

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् 13

खेटकं तोमरं चैव परशुं पाशमेव च
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् 14

दैत्यानां देहनाशाय भक्तानामभयाय च
धारयन्त्यायुधानीत्थं देवानां च हिताय वै 15

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे
महाबले महोत्साहे महाभयविनाशिनि 16

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता 17

दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी
प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी 18

उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा 19

एवं दश दिशो रक्षेच्चामुण्डा शववाहना
जया मे चाग्रतः पातु विजया पातु पृष्ठतः 20

अजिता वामपार्श्वे तु दक्षिणे चापराजिता
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता 21

मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके 22

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी
कपोलौ कालिका रक्षेत् कर्णमूले तु शङ्करी 23

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका
अधरे चामृतकला जिह्वायां च सरस्वती 24

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका
घण्टिकां चित्रघण्टा च महामाया च तालुके 25

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी 26

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी 27

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च
नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेत् कुलेश्वरी 28

स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी
हृदये ललितादेवी उदरे शूलधारिणी 29

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा
पूतना कामिका मेढ्रं गुदे महिषवाहिनी 30

कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी
जङ्घे महाबला रक्षेत् सर्वकामप्रदायिनी 31

गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी
पादाङ्गुलीषु श्री रक्षेत् पादाधस्तलवासिनी 32

नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा 33

रक्तमज्ज्ञावसामांसान्यस्थिमेदांसि पार्वती
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी 34

पद्मावती पद्मकोशे कफे चूडामणिस्तथा
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु 35

शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा
अहङ्कारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी 36

प्राणापानौ तथा व्यानमुदानं च समानकम्
वज्रहस्ता च मे रक्षेत् प्राणान् कल्याणशोभना 37

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा 38

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी 39

गोत्रमिन्द्राणि मे रक्षेत् पशून् मे रक्ष चण्डिके
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी 40

पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता 41

रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी 42

पदमेकं न गच्छेत् तु यदीच्छेच्छुभमात्मनः
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति 43

तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ७
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् 44

निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः
त्रैलोक्ये तु भवेत् पूज्यः कवचेनावृतः पुमान् 45

इदं तु देव्याः कवचं देवानामपि दुर्लभम्
यः पठेत् प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः 46

दैवी कला भवेत् तस्य त्रैलोक्येष्वपराजितः
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः 47

नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः
स्थावरं जङ्गमं चैव कृत्रिमं चैव यद्विषम् 48

अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः 49

सहजा कुलजा माला डाकिनी शाकिनी तथा
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः 50

ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः 51

नश्यन्ति दर्शनात् तस्य कवचे हृदि संस्थिते
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् 52

यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले
जपेत् सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा 53

यावद्भूमण्डलं धत्ते सशैलवनकाननम्
तावत् तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी 54

देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभम्
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः 55

लभते परमं रूपं शिवेन सह मोदते । ॐ 56

॥ इति देव्याः कवचं संपूर्णम् ॥

# अर्गला

अर्गलास्तोत्रमन्त्रस्य, विष्णुर्ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता, श्रीजगदम्बाप्रीतये सप्तशती-पाठाङ्गत्वेन जपे विनियोगः॥

ॐ नमश्चण्डिकायै

मार्कण्डेय उवाच –

जयन्ती मङ्गला काली भद्रकाली कपालिनी
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते 57

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते 58

मधुकैटभविद्राविविधातृवरदे नमः
रूपं देहि जयं देहि यशो देहि द्विषो जहि 59

महिषासुरनिर्णाशि भक्तानां सुखदे नमः
रूपं देहि जयं देहि यशो देहि द्विषो जहि 60

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 61

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 62

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 63

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 64

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे
रूपं देहि जयं देहि यशो देहि द्विषो जहि 65

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 66

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः
रूपं देहि जयं देहि यशो देहि द्विषो जहि 67

देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्
रूपं देहि जयं देहि यशो देहि द्विषो जहि 68

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः
रूपं देहि जयं देहि यशो देहि द्विषो जहि 69

विधेहि देवि कल्याणं विधेहि परमां श्रियम्
रूपं देहि जयं देहि यशो देहि द्विषो जहि 70

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके
रूपं देहि जयं देहि यशो देहि द्विषो जहि 71

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु
रूपं देहि जयं देहि यशो देहि द्विषो जहि 72

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे
रूपं देहि जयं देहि यशो देहि द्विषो जहि 73

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 74

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके
रूपं देहि जयं देहि यशो देहि द्विषो जहि 75

हिमाचलसुतानाथसंस्तुते परमेश्वरि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 76

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 77

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि
रूपं देहि जयं देहि यशो देहि द्विषो जहि 78

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके
रूपं देहि जयं देहि यशो देहि द्विषो जहि 79

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम्
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् 80

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः
स तु सप्तशतीसङ्ख्यावरमाप्नोति संपदाम् । ॐ 81

॥ इति देव्या अर्गलास्तोत्रं संपूर्णम् ॥

# कीलकम्

अस्य श्रीकीलकमन्त्रस्य, शिव ऋषिः, अनुष्टुप् छन्दः, श्रीमहासरस्वती देवता, श्रीजगदम्बाप्रीत्यर्थं सप्तशती-पाठाङ्गत्वेन जपे विनियोगः॥

ॐ नमश्चण्डिकायै

मार्कण्डेय उवाच –
विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे 1

सर्वमेतद् विजानीयान्मन्त्राणामभिकीलकम्
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः 2

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति 3

न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् 4

समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् 5

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् 6

सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः 7

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति
इत्थंरूपेण कीलेन महादेवेन कीलितम् 8

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम्
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः 9

न चैवाप्यटतस्तस्य भयं क्वापीह जायते
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् 10

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति
ततो ज्ञात्वैव संपन्नमिदं प्रारभ्यते बुधैः 11

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् 12

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे संपत्तिरुच्चकैः
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् 13

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसंपदः
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः । ॐ 14

॥ इति देव्याः कीलकस्तोत्रं संपूर्णम् ॥

# रात्रीसूक्तम्

[1] ॐ रात्रीत्याद्यष्टर्चस्य सूक्तस्य – कुशिकः सौभरो रात्रिर्वा भारद्वाजो ऋषिः, रात्रिर्देवता, गायत्री छन्दः, देवीमाहात्म्य-पाठे विनियोगः॥

अ॒हं रु॒द्रेभि॒र्वसु॑भिश्चराम्य॒हमा᳚दि॒त्यैरु॒त वि॒श्वदे᳚वैः।
अ॒हं मि॒त्रावरु॑णो॒भा बि॑भर्म्य॒हमि॑न्द्रा॒ग्नी अ॒हम॒श्विनो॒भा॥

अ॒हं सोम॑माह॒नसं॑ बिभर्म्य॒हं त्वष्टा᳚रमुत पूषणं॒ भग᳚म्।
अ॒हं द॑धामि॒ द्रवि॑णं ह॒विष्म॑ते सुप्रा॒व्ये॒३॒ यज॑मानाय सु॒न्वते॥

अ॒हं राष्ट्री᳚ सं॒गम॑नी॒ वसू᳚नां चिकि॒तुषी᳚ प्रथ॒मा य॒ज्ञिया᳚नाम्।
तां मा᳚ दे॒वा व्य॑दधुः पुरु॒त्रा भूरि॑ष्ठात्रां॒ भूर्यावि॒शय᳚न्तीम्॥

मया॒ सो अन्न॑मत्ति॒ यो वि॒पश्य॑ति॒ यः प्राणि॑ति॒ य ईं॑
शृणोत्युक्तम्। अ॒म॒न्तवो॒ मां त उप॑ क्षियन्ति श्रु॒धि श्रु॑त
श्रद्धि॒वं॑ ते᳚ वदामि॥

अ॒हमे॒व स्व॒यमि॒दं व॑दामि॒ जुष्टं॑ दे॒वेभि॑रु॒त मानु॑षेभिः।
यं का॒मये॒ तं त॑मुग्रं कृ॑णोमि॒ तं ब्र॒ह्माणं॒ तमृ॒षिं तं सु॑मे॒धाम्॥

---

[1] तन्त्रोक्तं रात्रिसूक्तं प्रथमाध्यायस्था ब्रह्मकृतस्तुतिः, “विश्वेश्वरीं जगद्धात्रीं” इत्यारभ्य “हन्तुमेतौ महासुरौ” इति यावत्

अ॒हं रु॒द्राय॒ धनु॒रा त॑नोमि ब्रह्म॒द्विषे॒ शर॑वे॒ हन्त॒वा उ॑।
अ॒हं जना᳚य स॒मदं॑ कृणोम्य॒हं द्यावा᳚पृथि॒वी आ वि॑वेश॥

अ॒हं सु॑वे पि॒तर॑मस्य मू॒र्धन्मम॒ योनि॑र॒प्स्व१॒॑न्तः स॑मु॒द्रे।
ततो॒ वि ति॑ष्ठे॒ भुव॒नानु॒ विश्वो॒तामूं द्यां व॒र्ष्मणोप॑ स्पृशामि॥

अ॒हमे॒व वात॑ इव॒ प्र वा᳚म्यारभ॑माणा॒ भुव॑नानि॒ विश्वा᳚।
प॒रो दि॒वा प॒र ए॒ना पृ॑थि॒व्यैताव॑ती महि॒ना सं ब॑भूव॥

# नवार्णजपः

अस्य श्रीनवार्णमन्त्रस्य, ब्रह्मविष्णुरुद्रा ऋषयः, गायत्र्युष्णिगनुष्टुभश्छन्दांसि, श्रीमहाकालीमहालक्ष्मी-महासरस्वत्यो देवताः, ऐं बीजं, ह्रीं शक्तिः, क्लीं कीलकं, श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थे जपे विनियोगः॥

ऐं अङ्गुष्ठाभ्यां नमः

ह्रीं तर्जनीभ्यां नमः

क्लीं मध्यमाभ्यां नमः

चामुण्डायै अनामिकाभ्यां नमः

विच्चे कनिष्ठिकाभ्यां नमः

ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः

ऐं हृदयाय नमः

ह्रीं शिरसे स्वाहा

क्लीं शिखायै वषट्

चामुण्डायै कवचाय हुम्

विच्चे नेत्रत्रयाय वौषट्

ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्

ध्यानम् –

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम्
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम्
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्

अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकाम्
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननाम्
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ( 108-धा )

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरी

# सप्तशतीन्यासः

प्रथममध्यमोत्तरचरित्राणां ब्रह्मविष्णुरुद्रा ऋषयः,
श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः,
गायत्र्युष्णिगनुष्टुभश्छन्दांसि, नन्दाशाकम्भरीभीमाः शक्तयः,
रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि, अग्निवायुसूर्यास्तत्त्वानि,
ऋग्यजुःसामवेदा ध्यानानि,
श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थे जपे
विनियोगः।

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा
अङ्गुष्ठाभ्यां नमः। हृदयाय नमः।

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च
तर्जनीभ्यां नमः। शिरसे स्वाहा।

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि
मध्यमाभ्यां नमः। शिखायै वषट्।

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम्
अनामिकाभ्यां नमः। कवचाय हुम्।

खड्गशूलगदादीनि यानि चास्त्रानि तेऽम्बिके
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः
कनिष्ठिकाभ्यां नमः। नेत्रत्रयाय वौषट्।

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते
करतलकरपृष्ठाभ्यां नमः। अस्त्राय फट्।

ध्यानम् –

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणाम्
कन्याभिः करवालकेटविलसद्धस्ताभिरासेविताम्
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीम्
विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे

# पूर्वपीठिका

सूत उवाच –

तपस्यन्तं महात्मानं मार्कण्डेयं महामुनिम्

व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत 1

जैमिनीरुवाच –

मार्कण्डेय महाप्राज्ञ सर्वशास्त्रविशारद

श्रोतुमिच्छाम्यशेषेण देवीमाहात्म्यमुत्तमम् 2

# प्रथमचरित्रम्

ॐ प्रथमचरित्रस्य, ब्रह्मा ऋषिः, महाकाली देवता, गायत्री छन्दः, नन्दा शक्तिः, रक्तदन्तिका बीजं, अग्निस्तत्वं, ऋग्वेदः स्वरूपं, श्रीमहाकालीप्रीत्यर्थे प्रथमचरित्रजपे विनियोगः॥

# प्रथमोऽध्यायः

## मधुकैटभवधः

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम्
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम्
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्
ॐ नमश्चण्डिकायै

ॐ ऐं मार्कण्डेय उवाच –
सावर्णिः सूर्यतनयो यो मनुः कथ्यते ऽष्टमः
निशामय तदुत्पत्तिं विस्तराद् गदतो मम 1

महामायानुभावेन यथा मन्वन्तराधिपः
स बभूव महाभागः सावर्णिस्तनयो रवेः 2

स्वारोचिषे ऽन्तरे पूर्वं चैत्रवंशसमुद्भवः
सुरथो नाम राजाऽभूत् समस्ते क्षितिमण्डले 3

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान्
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा 4

तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः 5

ततः स्वपुरमायातो निजदेशाधिपो ऽभवत्
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः 6

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः
कोशो बलं चापहृतं तत्रापि स्वपुरे ततः 7

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः
एकाकी हयमारुह्य जगाम गहनं वनम् 8

स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् 9

तस्थौ कञ्चित् स कालं च मुनिना तेन सत्कृतः
इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे 10

सोऽचिन्तयत् तदा तत्र ममत्वाकृष्टचेतनः [2] छ
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत्
मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा 11

---

[2] ममत्वाकृष्टमानसः। “कथं नु वर्तते राज्यं बलादपहृतः परैः” इत्युत्तरार्धः

न जाने स प्रधानो मे शूरहस्ती सदामदः
मम वैरिवशं यातः कान् भोगानुपलप्स्यते 12

ये ममानुगता नित्यं प्रसादधनभोजनैः
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् 13

असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम्
संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति 14

एतच्चान्यच्च सततं चिन्तयामास पार्थिवः
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः 15

स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः
सशोक इव कस्मात् त्वं दुर्मना इव लक्ष्यसे 16

इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम्
प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् 17

वैश्य उवाच –
समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः 18

विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम्
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः 19

सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम्
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः 20

किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम्
कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः 21

राजोवाच –
यैर्निरस्तो भवान् लुब्धैः पुत्रदारादिभिर्धनैः
तेषु किं भवतः स्नेहमनुबध्नाति मानसम् 22

वैश्य उवाच –
एवमेतद्यथा प्राह भवानस्मद्गतं वचः
किं करोमि न बध्नाति मम निष्ठुरतां मनः 23

यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः
पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः 24

किमेतन्नाभिजानामि जानन्नपि महामते
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु 25

तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् 26

मार्कण्डेय उवाच –

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः 27

कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम्
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ 28

राजोवाच –

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत्
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना 29

ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम 30

अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति 31

एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ 32

तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि
ममास्य च भवत्येषा विवेकान्धस्य मूढता 33

ऋषिरुवाच –

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे
विषयश्च महाभाग याति चैवं पृथक् पृथक् 34

दिवान्धाः प्राणिनः केचिद् रात्रावन्धास्तथापरे
केचिद् दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः 35

ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलम्
यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः 36

ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम्
मनुष्याणां च यत्तेषां तुल्यमन्यत् तथोभयोः 37

ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु
कणमोक्षादृतान् मोहात् पीड्यमानानपि क्षुधा 38

मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति
लोभात् प्रत्युपकाराय नन्वेतान् किं न पश्यसि 39

तथापि ममताऽऽवर्ते मोहगर्ते निपातिताः
महामायाप्रभावेण संसारस्थितिकारिणा 40

तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः
महामाया हरेश्चैषा तया संमोह्यते जगत् 41

ज्ञानिनामपि चेतांसि देवी भगवती हि सा
बलादाकृष्य मोहाय महामाया प्रयच्छति 42

तया विसृज्यते विश्वं जगदेतच्चराचरम्
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये 43

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी 44

राजोवाच –
भगवन् का हि सा देवी महामायेति यां भवान्
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज [3] 45

यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर 46

ऋषिरुवाच –
नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम्
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम 47

देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते 48

---

[3] कर्म चास्याश्च किं द्विज

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते
आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः 49

तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ 50

स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् 51

तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् 52

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम्
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः 53

ब्रह्मोवाच –
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता 54

अर्धमात्रा स्थिता नित्या याऽनुच्चार्या विशेषतः
त्वमेव संध्या सावित्री त्वं देवि जननी परा 55

त्वयैतद्धार्यते विश्वं त्वयैतत् सृज्यते जगत्
त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च सर्वदा 56

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने
तथा संहृतिरूपान्ते जगतो ऽस्य जगन्मये 57

महाविद्या महामाया महामेधा महास्मृतिः
महामोहा च भवती महादेवी महासुरी 58

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा 59

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च 60

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा 61

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी
परापराणां परमा त्वमेव परमेश्वरी 62

यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाऽखिलात्मिके
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा 63

यया त्वया जगत् स्रष्टा जगत् पात्यत्ति यो जगत्
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः 64

विष्णुः शरीरग्रहणमहमीशान एव च
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् 65

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ 66

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ 67

ऋषिरुवाच –
एवं स्तुता तदा देवी तामसी तत्र वेधसा
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ 68

नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः 69

उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः
एकार्णवेऽहिशयनात् ततः स ददृशे च तौ 70

मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ [4] 71

[4] क्रोधरक्तेक्षणौ हन्तुं ०

समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः 72

तावप्यतिबलोन्मत्तौ महामायाविमोहितौ
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् 73

श्रीभगवानुवाच –
भवेतामद्य मे तुष्टौ मम वध्यावुभावपि
किमन्येन वरेणात्र एतावद्धि वृतं मया 74

ऋषिरुवाच –
वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत्
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः छ
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता [5] 75

ऋषिरुवाच –
तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता
कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः 76

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम्
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते । ऐं ॐ 77

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये

---

[5] “प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वन्मृत्युरावयोः” इति पूर्वार्धः

मधुकैटभवधो नाम प्रथमोऽध्यायः ॥

# मध्यमचरित्रम्

ॐ मध्यमचरित्रस्य, विष्णुर्ऋषिः, महालक्ष्मीर्देवता, उष्णिक् छन्दः, शाकम्भरी शक्तिः, दुर्गा बीजं, वायुस्तत्त्वं, यजुर्वेदः स्वरूपं, श्रीमहालक्ष्मीप्रीत्यर्थे मध्यमचरित्रजपे विनियोगः॥

# द्वितीयोऽध्यायः

महिषासुरसैन्यवधः

अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकाम्
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननाम्
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्

ॐ ह्रीं ऋषिरुवाच –
देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा
महिषेऽसुराणामधिपे देवानां च पुरन्दरे 1

तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम्
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः 2

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम्
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ 3

यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम्
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् 4

सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च
अन्येषां चाधिकारान् सः स्वयमेवाधितिष्ठति 5

स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि
विचरन्ति यथा मर्त्या महिषेण दुरात्मना 6

एतद्वः कथितं सर्वममरारिविचेष्टितम्
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् 7

इत्थं निशम्य देवानां वचांसि मधुसूदनः
चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ 8

ततोऽतिकोपपूर्णस्य चक्रिणो वदनात् ततः
निश्चक्राम महत् तेजो ब्रह्मणः शङ्करस्य च 9

अन्येषां चैव देवानां शक्रादीनां शरीरतः
निर्गतं सुमहत् तेजस्तच्चैक्यं समगच्छत 10

अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम्
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् 11

अतुलं तत्र तत् तेजः सर्वदेवशरीरजम्
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा 12

यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम्
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा 13

सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत्
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः 14

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका 15

तस्यास्तु दन्ताः संभूताः प्राजापत्येन तेजसा
नयनत्रितयं जज्ञे तथा पावकतेजसा 16

भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च
अन्येषां चैव देवानां संभवस्तेजसां शिवा 17

ततः समस्तदेवानां तेजोराशिसमुद्भवाम्
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः 18

शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक्[6] छ

चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः
शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः 19

मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी
वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः 20

ददौ तस्यै सहस्राक्षो घण्टामैरावताद् गजात्
कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ 21

प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम्
समस्तरोमकूपेषु निजरश्मीन् दिवाकरः 22

कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलम्
क्षीरोदश्चामलं हारमजरे च तथाऽम्बरे 23

चूडामणिं तथा दिव्यं कुण्डले कटकानि च
अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु 24

नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम्
अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च 25

---

[6] “ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च” इति पूर्वार्धः

विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम्
अस्त्राण्यनेकरूपाणि तथाऽभेद्यं च दंशनम् 26

अम्लानपङ्कजां मालां शिरस्युरसि चापराम्
अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् 27

हिमवान् वाहनं सिंहं रत्नानि विविधानि च
ददावशून्यं सुरया पानपात्रं धनाधिपः 28

शेषश्च सर्वनागेशो महामणिविभूषितम्
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् 29

अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः 30

तस्या नादेन घोरेण कृत्स्नमापूरितं नभः
अमायताऽतिमहता प्रतिशब्दो महानभूत् 31

चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे
चचाल वसुधा चेलुः सकलाश्च महीधराः 32

जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम्
तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः 33

दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः 34

आः किमेतदिति क्रोधादाभाष्य महिषासुरः
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः 35

स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा
पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् 36

क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम्
दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम् 37

ततः प्रववृते युद्धं तया देव्या सुरद्विषाम्
शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् 38

महिषासुरसेनानीश्चिक्षुराख्यो महासुरः
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः 39

रथानामयुतैः षड्भिरुदग्राख्यो महासुरः
अयुध्यतायुतानां च सहस्रेण महाहनुः 40

पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे 41

गजवाजिसहस्रौघैरनेकैः परिवारितः
वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत 42

बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः
युयुधे संयुगे तत्र रथानां परिवारितः 43

अन्ये च तत्रायुतशो रथनागहयैर्वृताः
युयुधुः संयुगे देव्या सह तत्र महासुराः 44

कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा
हयानां च वृतो युद्धे तत्राभून्महिषासुरः 45

तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः 46

केचिच्च चिक्षिपुः शक्तीः केचित् पाशांस्तथापरे
देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः 47

सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका
लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी 48

अनायस्तानना देवी स्तूयमाना सुरर्षिभिः
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी 49

सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी
चचारासुरसैन्येषु वनेष्विव हुताशनः 50

निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका
त एव सद्यः संभूता गणाः शतसहस्रशः 51

युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः
नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः 52

अवादयन्त पटहान् गणाः शङ्खांस्तथापरे
मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे 53

ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः [7]
खड्गादिभिश्च शतशो निजघान महासुरान् 54

पातयामास चैवान्यान् घण्टास्वनविमोहितान्
असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् 55

केचिद् द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे
विपोथिता निपातेन गदया भुवि शेरते 56

वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः
केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि 57

---

[7] शरवृष्टिभिः

निरन्तराः शरौघेण कृताः केचिद्रणाजिरे
श्येनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः [8] 58

केषांचिद् बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे
शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः 59

विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः
एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः 60

छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः
कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः [9] ७
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः 61

कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः 62

पातितै रथनागाश्वैरसुरैश्च वसुन्धरा
अगम्या साभवत्तत्र यत्राभूत् स महारणः 63

शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् 64

---

[8] सेनानुकारिणः

[9] श्लोकार्धोऽयं क्वचिदेव श्रूयते

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् 65

स च सिंहो महानादमुत्सृजन् धुतकेसरः
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति 66

देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः
यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि । ॐ [10] 67

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥

# तृतीयोऽध्यायः

महिषासुरवधः

उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकाम्
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम्
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियम्
देवीं बद्धहिमांशुरत्नमुकुटां वन्देऽरविन्दस्थिताम्

[10] यथैषां तुष्टुवुर्देवाः ०

ॐ ऋषिरुवाच –

निहन्यमानं तत्सैन्यमवलोक्य महासुरः
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् 1

स देवीं शरवर्षेण ववर्ष समरेऽसुरः
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः 2

तस्य छित्वा ततो देवी लीलयैव शरोत्करान्
जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम् 3

चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम्
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः 4

सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः 5

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि
आजघान भुजे सव्ये देवीमप्यतिवेगवान् 6

तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन
ततो जग्राह शूलं स कोपादरुणलोचनः 7

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् 8

दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत
तच्छूलं शतधा तेन नीतं स च महासुरः 9

हते तस्मिन् महावीर्ये महिषस्य चमूपतौ
आजगाम गजारूढश्चामरस्त्रिदशार्दनः 10

सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम्
हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् 11

भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् 12

ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा 13

युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः 14

ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा
करप्रहारेण शिरश्चामरस्य पृथक् कृतम् 15

उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः
दन्तमुष्टितलैश्चैव करालश्च निपातितः 16

देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम्
बाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् 17

उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम्
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी 18

बिडालस्यासिना कायात् पातयामास वै शिरः
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् 19

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः
माहिषेण स्वरूपेण त्रासयामास तान् गणान् 20

कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान्
लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्यां च विदारितान् 21

वेगेन कांश्चिदपरान्नादेन भ्रमणेन च
निःश्वासपवनेनान्यान् पातयामास भूतले 22

निपात्य प्रमथानीकमभ्यधावत सोऽसुरः
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका 23

सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च 24

वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः 25

धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः 26

इति क्रोधसमाध्मातमापतन्तं महासुरम्
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् 27

सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम्
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे 28

ततः सिंहोऽभवत् सद्यो यावत् तस्याम्बिका शिरः
छिनत्ति तावत् पुरुषः खड्गपाणिरदृश्यत 29

तत एवाशु पुरुषं देवी चिच्छेद सायकैः
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः 30

करेण च महासिंहं तं चकर्ष जगर्ज च
कर्षतस्तु करं देवी खड्गेन निरकृन्तत 31

ततो महासुरो भूयो माहिषं वपुरास्थितः
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् 32

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम्
पपौ पुनः पुनश्चैव जहासारुणलोचना 33

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् 34

सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् 35

देव्युवाच –
गर्ज गर्ज क्षणं मूढ मधु यावत् पिबाम्यहम्
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः 36

ऋषिरुवाच –
एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम्
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् 37

ततः सोऽपि पदाक्रान्तस्तया निजमुखात् ततः
अर्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृतः 38

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः
तया महासिना देव्या शिरश्छित्त्वा निपातितः 39

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्
प्रहर्षं च परं जग्मुः सकला देवतागणाः 40

तुष्टुवुस्तां सुरा देवीं सहदिव्यैर्महर्षिभिः
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः । ॐ 41

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोऽध्यायः ॥

# चतुर्थोऽध्यायः

शुक्रादिस्तुतिः

कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखाम्
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम्
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीम्
ध्यायेद् दुर्गां ज्याख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः

ॐ ऋषिरुवाच –
शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन् दुरात्मनि सुरारिबले च देव्या
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः 1

देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः 2

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च
सा चण्डिकाऽखिलजगत् परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु 3

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् 4

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु 5

हेतुः समस्तजगतां त्रिगुणापि दोषैः
न ज्ञायसे हरिहरादिभिरप्यपारा
सर्वाश्रयाखिलमिदं जगदंशभूतम्
अव्याकृता हि परमा प्रकृतिस्त्वमाद्या 6

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि
स्वाहासि वै पितृगणस्य च तृप्तिहेतुः
उच्चार्यसे त्वमत एव जनैः स्वधा च 7

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वम्
अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैः
विद्यासि सा भगवती परमा हि देवि 8

शब्दात्मिका सुविमलर्ग्यजुषां निधानम्
उद्गीथरम्यपदपाठवतां च साम्नाम्
देवी त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री 9

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा 10

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम्
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण 11

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालम्
उद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः
प्राणान् मुमोच महिषस्तदतीव चित्रम्
कैर्जीव्यते हि कुपितान्तकदर्शनेन 12

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि
विज्ञातमेतदधुनैव यदस्तमेतत्
नीतं बलं सुविपुलं महिषासुरस्य 13

ते संमता जनपदेषु धनानि तेषाम्
तेषां यशांसि न च सीदति धर्मवर्गः
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना 14

धर्म्याणि देवि सकलानि सदैव कर्माणि
अत्यादृतः प्रतिदिनं सुकृती करोति
स्वर्गं प्रयाति च ततो भवती प्रसादात्
लोकत्रयेऽपि फलदा ननु देवि तेन 15

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता 16

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम्
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि 17

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम्
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी 18

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम्
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् 19

दुर्वृत्तवृत्तशमनं तव देवि शीलम्
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः
वीर्यं च हन्तृहृतदेवपराक्रमाणाम्
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् 20

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि 21

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा
नीता दिवं रिपुगणा भयमप्यपास्तम्
अस्माकमुन्मदसुरारिभवं नमस्ते 22

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च 23

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि 24

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् 25

खड्गशूलगदादीनि यानि चास्त्रानि तेऽम्बिके
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः 26

ऋषिरुवाच –
एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः 27

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता [11]
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् 28

देव्युवाच –
व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् 29

देवा ऊचुः –
भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते
यदयं निहतः शत्रुरस्माकं महिषासुरः 30

यदि चापि वरो देयस्त्वयाऽस्माकं महेश्वरि
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः 31

यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॐ
तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम्
वृद्धयेऽस्मत् प्रसन्ना त्वं भवेथाः सर्वदाम्बिके 32

ऋषिरुवाच –
इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप 33

[11] ॰ धूपैः सुधूपिता

इत्येतत्कथितं भूप संभूता सा यथा पुरा
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी 34

पुनश्च गौरीदेहात् सा समुद्भूता यथाऽभवत्
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः 35

रक्षणाय च लोकानां देवानामुपकारिणी
तच्छृणुष्व मयाऽऽख्यातं यथावत् कथयामि ते । ह्रीं ॐ 36

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ॥

# उत्तरचरित्रम्

अस्य उत्तरचरित्रस्य, रुद्र ऋषिः, श्रीमहासरस्वती देवता, अनुष्टुप् छन्दः, भीमा शक्तिः, भ्रामरी बीजं, सूर्यस्तत्त्वं, सामवेदः स्वरूपं, श्रीमहासरस्वतीप्रीत्यर्थे उत्तरचरित्रपाठे विनियोगः॥

## पञ्चमोऽध्यायः

देव्या दूतसंवादः

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकम्
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्

ॐ क्लीं ऋषिरुवाच –
पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् 1

तावेव सूर्यतां तद्वदधिकारं तथैन्दवम्
कौबेरमथ याम्यं च चक्राते वरुणस्य च 2

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः 3

हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः
महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् 4

तयास्माकं वरो दत्तो यथाऽपत्सु स्मृताखिलाः
भवतां नाशयिष्यामि तत्क्षणात् परमापदः 5

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम्
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः 6

देवा ऊचुः –
नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् 7

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः 8

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः 9

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः 10

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः 11

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 12

या देवी सर्वभूतेषु चेतनेत्यभिधीयते
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 13

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 14

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 15

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 16

या देवी सर्वभूतेषु छायारूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 17

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 18

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 19

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 20

या देवी सर्वभूतेषु जातिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 21

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 22

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 23

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 24

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 25

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 26

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 27

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 28

या देवी सर्वभूतेषु दयारूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 29

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 30

या देवी सर्वभूतेषु मातृरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 31

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 32

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः 33

चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत्
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः 34

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः 35

या साम्प्रतं चोद्धतदैत्यतापितैः
अस्माभिरीशा च सुरैर्नमस्यते
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः 36

ऋषिरुवाच –
एवं स्तवादियुक्तानां देवानां तत्र पार्वती
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन 37

साब्रवीत् तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का
शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा 38

स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः
देवैः समेतैः समरे निशुम्भेन पराजितैः [12] 39

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका
कौशिकीति समस्तेषु ततो लोकेषु गीयते 40

---

[12] देवैः समस्तैः ०

तस्यां विनिर्गतायां तु कृष्णाभूत् सापि पार्वती
कालिकेति समाख्याता हिमाचलकृताश्रया 41

ततोऽम्बिका परं रूपं बिभ्राणां सुमनोहरम्
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः 42

ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् 43

नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम्
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर 44

स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति 45

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे 46

ऐरावतः समानीतो गजरत्नं पुरन्दरात्
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः 47

विमानं हंससंयुक्तमेतत् तेष्ठति तेऽङ्गणे
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् 48

निधिरेष महापद्मः समानीतो धनेश्वरात्
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् 49

छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति
तथायं स्यन्दनवरो यः पुरासीत्प्रजापतेः 50

मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे 51

निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः
वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी 52

एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते 53

ऋषिरुवाच –
निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् 54

इति चेति च वक्तव्या सा गत्वा वचनान्मम
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु 55

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा 56

दूत उवाच –

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः 57

अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु
निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् 58

मम त्रैलोक्यमखिलं मम देवा वशानुगाः
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् 59

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः
तथैव गजरत्नं च हृत्वा देवेन्द्रवाहनम् 60

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः
उच्चैःश्रवससंज्ञं तत् प्रणिपत्य समर्पितम् 61

यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च
रत्नभूतानि भूतानि तानि मय्येव शोभने 62

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम्
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् 63

मां वा ममानुजं वापि निशुम्भमुरुविक्रमम्
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः 64

परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात्
एतद् बुद्ध्या समालोच्य मत्परिग्रहतां व्रज 65

ऋषिरुवाच –
इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् 66

देव्युवाच –
सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित् त्वयोदितम्
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः 67

किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम्
श्रूयतामल्पबुद्धित्वात् प्रतिज्ञा या कृता पुरा 68

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति 69

तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु 70

दूत उवाच –
अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः 71

अन्येषामपि दैत्यानां सर्वे देवा न वै युधि
तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका 72

इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम् 73

सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि 74

देव्युवाच –
एवमेतद् बली शुम्भो निशुम्भश्चातिवीर्यवान्
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा 75

स त्वं गच्छ मयोक्तं ते यदेतत् सर्वमादृतः
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत् । ॐ 76

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्या दूतसंवादो नाम पञ्चमोऽध्यायः ॥

# षष्ठोऽध्यायः

धूम्रलोचनवधः

नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्नावली-
भास्वद्देहलतां दिवाकरनिभां नेत्रत्रयोद्भासिताम्
मालाकुम्भकपालनीरजकरां चन्द्रार्धचूडां पराम्
सर्वज्ञेश्वरभैरवाङ्कनिलयां पद्मावतीं चिन्तये

ॐ ऋषिरुवाच –
इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः
समाचष्ट समागम्य दैत्यराजाय विस्तरात् 1

तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् 2

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः
तामानय बलाद् दुष्टां केशाकर्षणविह्वलाम् 3

तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा 4

ऋषिरुवाच –

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ 5

स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम्
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः 6

न चेत् प्रीत्याद्य भवती मद्भर्तारमुपैष्यति
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् 7

देव्युवाच –

दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः
बलान्नयसि मामेवं ततः किं ते करोम्यहम् 8

ऋषिरुवाच –

इत्युक्तः सोऽभ्यधावत् तामसुरो धूम्रलोचनः
हुंकारेणैव तं भस्म सा चकाराम्बिका तदा 9

अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः 10

ततो धुतसटः कोपात् कृत्वा नादं सुभैरवम्
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः 11

काश्चित् करप्रहारेण दैत्यानास्येन चापरान्
आक्रम्य चाधरेणान्यान् स जघान महासुरान् [13] 12

केषांचित् पाटयामास नखैः कोष्ठानि केसरी
तथा तलप्रहारेण शिरांसि कृतवान् पृथक् 13

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः 14

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना
तेन केसरिणा देव्या वाहनेनातिकोपिना 15

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम्
बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः 16

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ 17

हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ
तत्र गच्छत गत्वा च सा समानीयतां लघु 18

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् 19

---

[13] आक्रम्य चरणेनान्यान् ।

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् । ॐ 20

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥

# सप्तमोऽध्यायः

चण्डमुण्डवधः

ध्यायेयं रत्नपीठे शुककलपठितं शृण्वतीं श्यामलाङ्गीम्
न्यस्तैकाङ्घ्रिं सरोजे शशिशकलधरां वल्लकीं वादयन्तीम्
कह्लाराबद्धमालां नियमितविलसच्चोलिकां रक्तवस्त्राम्
मातङ्गीं शङ्खपात्रां मधुरमधुमदां चित्रकोद्भासिभालाम्

ॐ ऋषिरुवाच –
आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः 1

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम्
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने 2

ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः 3

ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति
कोपेन चास्या वदनं मषीवर्णमभूत् तदा 4

भ्रुकुटीकुटिलात् तस्या ललाटफलकाद् द्रुतम्
काली करालवदना विनिष्क्रान्तासिपाशिनी 5

विचित्रखट्वाङ्गधरा नरमालाविभूषणा
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा 6

अतिविस्तारवदना जिह्वाललनभीषणा
निमग्नारक्तनयना नादापूरितदिङ्मुखा 7

सा वेगेनाभिपतिता घातयन्ती महासुरान्
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् 8

पार्ष्णिग्राहाङ्कुशग्राहयोधघण्टासमन्वितान्
समादायैकहस्तेन मुखे चिक्षेप वारणान् 9

तथैव योधं तुरगै रथं सारथिना सह
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् 10

एकं जग्राह केशेषु ग्रीवायामथ चापरम्
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् 11

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः
मुखेन जग्राह रुषा दशनैर्मथितान्यपि 12

बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम्
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत् तथा 13

असिना निहताः केचित् केचित् खट्वाङ्गताडिताः
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा 14

क्षणेन तद्बलं सर्वमसुराणां निपातितम्
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् 15

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः 16

तानि चक्राण्यनेकानि विशमानानि तन्मुखम्
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् 17

ततो जहासातिरुषा भीमं भैरवनादिनी
काली करालवदना दुर्दर्शदशनोज्ज्वला 18

उत्थाय च महासिंहं देवी चण्डमधावत
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाऽच्छिनत् 19

अथ मुण्डोऽभ्यधावत् तां दृष्ट्वा चण्डं निपातितम्
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा 20

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम्
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् 21

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् 22

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि 23

ऋषिरुवाच –
तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ
उवाच कालीं कल्याणी ललितं चण्डिका वचः 24

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि । ॐ 25

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधो नाम सप्तमोऽध्यायः ॥

# अष्टमोऽध्यायः

रक्तबीजवधः

अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशबाणचापहस्ताम्
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम्

ॐ ऋषिरुवाच –
चण्डे च निहते दैत्ये मुण्डे च विनिपातिते
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः 1

ततः कोपपराधीनचेताः शुम्भः प्रतापवान्
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह 2

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः 3

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया 4

कालका दौर्हृदा मौर्वाः कालिकेयास्तथासुराः
युद्धाय सज्ञा निर्यान्तु आज्ञया त्वरिता मम 5

इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः 6

आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम्
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् 7

ततः सिंहो महानादमतीव कृतवान्नृप
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् 8

धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा
निनादैर्भीषणैः काली जिग्ये विस्तारितानना 9

तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम्
देवी सिंहस्तथा काली सरोषैः परिवारिताः 10

एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम्
भवायामरसिंहानामतिवीर्यबलान्विताः 11

ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः 12

यस्य देवस्य यद्रूपं यथा भूषणवाहनम्
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ 13

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः
आयाता ब्रह्मणः शक्तिर्ब्रह्माणीत्यभिधीयते 14

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा 15

कौमारी शक्तिहस्ता च मयूरवरवाहना
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी 16

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ 17

यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः [14]
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् 18

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः 19

वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा 20

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः
हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् 21

ततो देवीशरीरात् तु विनिष्क्रान्तातिभीषणा
चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी 22

[14] ॰ विभ्रती हरेः

सा चाह धूम्रजटिलमीशानमपराजिता
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः 23

ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः 24

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः
यूयं प्रयात पातालं यदि जीवितुमिच्छथ 25

बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः 26

यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम्
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता 27

तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता 28

ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः
ववर्षुरुद्धतामर्षास्तां देवीममरारयः 29

सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान्
चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः 30

तस्याग्रतस्तथा काली शूलपातविदारितान्
खट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत् तदा 31

कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति 32

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी
दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना 33

ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः 34

तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः 35

नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान्
नारसिंही चचाराजौ नादापूर्णदिगम्बरा 36

चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा 37

इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान्
दृष्ट्वाऽभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः 38

पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान्
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः 39

रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः
समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः 40

युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् 41

कुलिशेनाहतस्याशु बहु सुस्राव शोणितम्
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः 42

यावन्तः पतितास्तस्य शरीराद् रक्तबिन्दवः
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः 43

ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् 44

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः 45

वैष्णवी समरे चैनं चक्रेणाभिजघान ह
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् 46

वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः 47

शक्त्या जघान कौमारी वाराही च तथाऽसिना
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् 48

स चापि गदया दैत्यः सर्वा एवाहनत् पृथक्
मातॄः कोपसमाविष्टो रक्तबीजो महासुरः 49

तस्याऽहतस्य बहुधा शक्तिशूलादिभिर्भुवि
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः 50

तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत्
व्याप्तमासीत् ततो देवा भयमाजग्मुरुत्तमम् 51

तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरम्
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु 52

मच्छस्त्रपातसंभूतान् रक्तबिन्दून् महासुरान्
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना 53

भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान्
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति 54

भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ऌ
मुखेन काली जगृहे रक्तबीजस्य शोणितम् 55

ततोऽसावाजघानाथ गदया तत्र चण्डिकाम्
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि 56

तस्याऽहतस्य देहात् तु बहु सुस्राव शोणितम्
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति 57

मुखे समुद्गता येऽस्या रक्तपातान्महासुराः
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् 58

देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः
जघान रक्तबीजं तं चामुण्डापीतशोणितम् 59

स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः
नीरक्तश्च महीपाल रक्तबीजो महासुरः 60

ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः 61

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तबीजवधो नाम अष्टमोऽध्यायः ॥

# नवमोऽध्यायः

## निशुम्भवधः

बन्धूककाञ्चननिभं रुचिराक्षमालाम्
पाशाङ्कुशौ च वरदां निजबाहुदण्डैः
बिभ्राणामिन्दुशकलाभरणं त्रिनेत्रम्
अर्धाम्बिकेशमनिशं वपुराश्रयामि

ॐ राजोवाच –
विचित्रमिदमाख्यातं भगवन् भवता मम
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् 1

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः 2

ऋषिरुवाच –
चकार कोपमतुलं रक्तबीजे निपातिते
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे 3

हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन्
अभ्यधावन्निशुम्भोऽथ मुख्ययाऽसुरसेनया 4

तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः 5

आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः
निहन्तुं चण्डिकां कोपात् कृत्वा युद्धं तु मातृभिः 6

ततो युद्धमतीवासीद्देव्या शुम्भनिशुम्भयोः
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः 7

चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः
ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ 8

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम्
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् 9

ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम्
निशुम्भस्याऽशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् 10

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् 11

कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः
आयातं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् 12

आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति [15]
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता 13

ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम्
आहत्य देवी बाणौघैरपातयत भूतले 14

तस्मिन् निपतिते भूमौ निशुम्भे भीमविक्रमे
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् 15

स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः 16

तमायान्तं समालोक्य देवी शङ्खमवादयत्
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् 17

पूरयामास ककुभो निजघण्टास्वनेन च
समस्तदैत्यसैन्यानां तेजोवधविधायिना 18

ततः सिंहो महानादैस्त्याजितेभमहामदैः
पूरयामास गगनं गां तथैव दिशो दश 19

ततः काली समुत्पत्य गगनं क्ष्मामताडयत्
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः 20

---

[15] अथादाय गदां ०

अट्टाट्टहासमशिवं शिवदूती चकार ह
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ 21

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः 22

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया 23

सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम्
निर्घातनिःस्वनो घोरो जितवानवनीपते 24

शुम्भमुक्ताञ्छरान् देवी शुम्भस्तत्प्रहिताञ्छरान्
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः 25

ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम्
स तदाभिहतो भूमौ मूर्च्छितो निपपात ह 26

ततो निशुम्भः संप्राप्य चेतनामात्तकार्मुकः
आजघान शरैर्देवीं कालीं केसरिणं तथा 27

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् 28

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी
चिच्छेद देवी चक्राणि स्वशरैः सायकांश्च तान् 29

ततो निशुम्भो वेगेन गदामादाय चण्डिकाम्
अभ्यधावत वै हन्तुं दैत्यसैन्यसमावृतः 30

तस्याऽपतत एवाशु गदां चिच्छेद चण्डिका
खड्गेन शितधारेण स च शूलं समाददे 31

शूलहस्तं समायान्तं निशुम्भममरार्दनम्
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका 32

भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् 33

तस्य निष्क्रामतो देवी प्रहस्य स्वनवत् ततः
शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि 34

ततः सिंहश्चखादोग्रं दंष्ट्राक्षुण्णशिरोधरान्
असुरांस्तांस्तथा काली शिवदूती तथाऽपरान् 35

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः
ब्रह्माणीमन्त्रपूतेन तोयेनाऽन्ये निराकृताः 36

माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि 37

खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे 38

केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात्
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः । ॐ 39

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशुम्भवधो नाम नवमोऽध्यायः ॥

# दशमोऽध्यायः

शुम्भवधः

उत्तप्तहेमरुचिरां रविचन्द्रवह्नि-
नेत्रां धनुःशरयुताङ्कुशपाशशूलम्
रम्यैर्भुजैश्च दधतीं शिवशक्तिरूपाम्
कामेश्वरीं हृदि भजामि धृतेन्दुलेखाम्

ॐ ऋषिरुवाच –
निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम्
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः 1

बलावलेपाद् दुष्टे त्वं मा दुर्गे गर्वमावह
अन्यासां बलमाश्रित्य युद्ध्यसे चातिमानिनी 2

देव्युवाच –
एकैवाहं जगत्यत्र द्वितीया का ममापरा
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः 3

ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम्
तस्या देव्यास्तनौ जग्मुरेकैवासीत् तदाम्बिका 4

देव्युवाच –
अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव 5

ऋषिरुवाच –
ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः
पश्यतां सर्वदेवानामसुराणां च दारुणम् 6

शरवर्षैः शितैः शस्त्रैस्तथा चास्त्रैः सुदारुणैः
तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् 7

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः 8

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः 9

ततः शरशतैर्देवीमाच्छादयत सोऽसुरः
साऽपि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः 10

छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् 11

ततः खड्गमुपादाय शतचन्द्रं च भानुमत्
अभ्यधावत् तदा देवीं दैत्यानामधिपेश्वरः 12

तस्याऽपतत एवाशु खड्गं चिच्छेद चण्डिका
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् 13

हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः [16] 14
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः
चिच्छेदाऽपततस्तस्य मुद्गरं निशितैः शरैः 15

तथापि सोऽभ्यधावत् तां मुष्टिमुद्यम्य वेगवान्
स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः 16

[16] “अश्वांश्च पातयामास रथं सारथिना सह” इति पूर्वार्धः

देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्
तलप्रहाराभिहतो निपपात महीतले 17

स दैत्यराजः सहसा पुनरेव तथोत्थितः
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः 18
तत्रापि सा निराधारा युयुधे तेन चण्डिका ६९

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम्
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् 19

ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह
उत्पाट्य भ्रामयामास चिक्षेप धरणीतले 20

स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया 21

तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम्
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि 22

स गतासुः पपातोर्व्यां देवी शूलाग्रविक्षतः
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् 23

ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः 24

उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते 25

ततो देवगणाः सर्वे हर्षनिर्भरमानसाः
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः 26

अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः 27
जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः [17] ७

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भवधो नाम दशमोऽध्यायः ॥

# एकादशोऽध्यायः

देव्याः स्तुतिः

बालरविद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम्
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम्

[17] श्लोकार्धोऽयं क्वचिदेव श्रूयते

ॐ ऋषिरुवाच –

देव्या हते तत्र महासुरेन्द्रे
सेन्द्राः सुरा वह्निपुरोगमास्ताम्
कात्यायनीं तुष्टुवुरिष्टलाभाद्
विकाशिवक्त्राब्जविकाशिताशाः 1

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य 2

आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि
अपां स्वरूपस्थितया त्वयैतत्
आप्यायते कृत्स्नमलङ्घ्यवीर्ये 3

त्वं वैष्णवीशक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया
संमोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः 4

विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः 5

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी [18]
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः 6

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते 7

कलाकाष्ठादिरूपेण परिणामप्रदायिनि
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते 8

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके [19]
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते 9

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते 10

शरणागतदीनार्तपरित्राणपरायणे
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते 11

---

[18] ॰ भुक्तिमुक्तिप्रदायिनी

[19] सर्वमङ्गलमाङ्गल्ये ॰

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि
कौशाम्भः क्षरिके देवि नारायणि नमोऽस्तु ते 12

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तुते 13

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते 14

शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते 15

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते 16

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते 17

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते 18

शिवदूतीस्वरूपेण हतदैत्यमहाबले
घोररूपे महारावे नारायणि नमोऽस्तु ते 19

दंष्ट्राकरालवदने शिरोमालाविभूषणे
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते 20

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे [20]
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते [21] 21

मेधे सरस्वति वरे भूति बाभ्रवि तामसि
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते 22

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते 23

एतत् ते वदनं सौम्यं लोचनत्रयभूषितम्
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते 24

ज्वालाकरालमत्युग्रमशेषासुरसूदनम्
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते 25

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव 26

---

[20] ॰ पुष्टे स्वधे ध्रुवे

[21] महारात्रे महामाये ॰

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् 27

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् [22]
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति 28

एतत्कृतं यत्कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणाम्
रूपैरनेकैर्बहुधात्ममूर्तिम्
कृत्वाऽम्बिके तत्प्रकरोति काऽन्या 29

विद्यासु शास्त्रेषु विवेकदीपेषु
आद्येषु वाक्येषु च का त्वदन्या
ममत्वगर्तेऽतिमहान्धकारे
विभ्रामयत्येतदतीव विश्वम् 30

---

[22] ददासि कामान् ०

रक्षांसि यत्रोग्रविषाश्च नागा
यत्रारयो दस्युबलानि यत्र
दावानलो यत्र तथाऽब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम् 31

विश्वेश्वरि त्वं परिपासि विश्वम्
विश्वात्मिका धारयसीह विश्वम्
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः 32

देवि प्रसीद परिपालय नोऽरिभीतेः
नित्यं यथाऽसुरवधादधुनैव सद्यः
पापानि सर्वजगतां प्रशमं नयाऽशु
उत्पातपाकजनितांश्च महोपसर्गान् 33

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव 34

देव्युवाच –
वरदाहं सुरगणा वरं यन्मनसेच्छथ
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् 35

देवा ऊचुः –

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् 36

देव्युवाच –

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ 37

नन्दगोपगृहे जाता यशोदागर्भसंभवा
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी 38

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले
अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान् 39

भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान्
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः 40

ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् 41

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि
मुनिभिः संस्मृता भूमौ संभविष्याम्ययोनिजा 42

ततः शतेन नेत्राणां निरीक्षिष्याम्यहं मुनीन्
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः 43

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः छ
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि 44

तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्
दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति 45

पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् 46

तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः
भीमादेवीति विख्यातं तन्मे नाम भविष्यति 47

यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति
तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम् 48

त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः 49

इत्थं यदा यदा बाधा दानवोत्था भविष्यति
तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम् । ॐ 50

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्याः स्तुतिर्नाम एकादशोऽध्यायः ॥

# द्वादशोऽध्यायः

फलस्तुतिः

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणाम्
कन्याभिः करवालकेटविलसद्धस्ताभिरासेविताम्
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीम्
विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे

ॐ देव्युवाच –
एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् 1

मधुकैटभनाशं च महिषासुरघातनम्
कीर्तयिष्यन्ति ये तद्वद् वधं शुम्भनिशुम्भयोः 2

अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् 3

न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् 4

शत्रुतो न भयं तस्य दस्युतो वा न राजतः
न शस्त्रानलतोयौघात् कदाचित् संभविष्यति 5

तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् 6

उपसर्गानशेषांस्तु महामारीसमुद्भवान्
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम 7

यत्रैतत् पठ्यते सम्यङ्नित्यमायतने मम
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् 8

बलिप्रदाने पूजायामग्निकार्ये महोत्सवे
सर्वं ममैतन्माहात्म्यमुच्चार्यं श्राव्यमेव च 9

जानताऽजानता वापि बलिपूजां यथा कृताम्
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथाकृतम् 10

शरत्काले महापूजा क्रियते या च वार्षिकी
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः 11

सर्वाबाधाविनिर्मुक्तो धनधान्यसमन्वितः
मनुष्यो मत्प्रसादेन भविष्यति न संशयः 12

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् 13

रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् 14

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम 15

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते 16

बालग्रहाभिभूतानां बालानां शान्तिकारकम्
संघातभेदे च नृणां मैत्रीकरणमुत्तमम् 17

दुर्वृत्तानामशेषाणां बलहानिकरं परम्
रक्षोभूतपिशाचानां पठनादेव नाशनम् 18
सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ७

पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः
विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् 19

अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या
प्रीतिर्मे क्रियते साऽस्मिन् सकृदुच्चरिते श्रुते 20

श्रुतं हरति पापानि तथाऽरोग्यं प्रयच्छति
रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम 21

युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम्
तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते 22

युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः
ब्रह्मणा च कृतास्तास्तु प्रयच्छन्तु शुभां मतिम् 23

अरण्ये प्रान्तरे वाऽपि दावाग्निपरिवारितः
दस्युभिर्वा वृतः शून्ये गृहीतो वाऽपि शत्रुभिः 24

सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः
राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा 25

आघूर्णितो वा वातेन स्थितः पोते महार्णवे
पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे 26

सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा
स्मरन् ममैतच्चरितं नरो मुच्येत सङ्कटात् 27

मम प्रभावात् सिंहाद्या दस्यवो वैरिणस्तथा
दूरादेव पलायन्ते स्मरतश्चरितं मम 28

ऋषिरुवाच –

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा
पश्यतामेव देवानां तत्रैवान्तरधीयत [23] 29

तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा
यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः 30

दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि
जगद्विध्वंसके तस्मिन् महोग्रेऽतुलविक्रमे छ
निशुम्भे च महावीर्ये शेषाः पातालमाययुः 31

एवं भगवती देवी सा नित्यापि पुनः पुनः
संभूय कुरुते भूप जगतः परिपालनम् 32

तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति 33

व्याप्तं तयैतत् सकलं ब्रह्माण्डं मनुजेश्वर
महादेव्या महाकाली महामारीस्वरूपया 34

सैव काले महामारी सैव सृष्टिर्भवत्यजा
स्थितिं करोति भूतानां सैव काले सनातनी 35

---

[23] पश्यतां सर्वदेवानां ०

भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे
सैवाभावे तथाऽलक्ष्मीर्विनाशायोपजायते 36

स्तुता संपूजिता पुष्पैर्गन्धधूपादिभिस्तथा
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् । ॐ 37

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये फलस्तुतिर्नाम द्वादशोऽध्यायः ॥

# त्रयोदशोऽध्यायः

वरप्रदानम्

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्
पाशाङ्कुशवराभीतीर्धारयन्तीं शिवां भजे

ॐ ऋषिरुवाच –
एतत् ते कथितं भूप देवीमाहात्म्यमुत्तमम् ७

एवंप्रभावा सा देवी ययेदं धार्यते जगत्
विद्या तथैव क्रियते भगवद्विष्णुमायया 1

तया त्वमेष वैश्यश्च तथैवाऽन्ये विवेकिनः
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे 2

तामुपैहि महाराज शरणं परमेश्वरीम्
आराधिता सैव नृणां भोगस्वर्गापवर्गदा 3

मार्कण्डेय उवाच –
इति तस्य वचः श्रुत्वा सुरथः स नराधिपः
प्रणिपत्य महाभागं तमृषिं संशितव्रतम् 4

निर्विण्णोऽतिममत्वेन राज्यापहरणेन च
जगाम सद्यस्तपसे स च वैश्यो महामुने 5

संदर्शनार्थमम्बाया नदीपुलिनमास्थितः
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् 6

तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम्
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः 7

निराहारौ यतात्मानौ तन्मनस्कौ समाहितौ [24]
ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् 8

एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका 9

---

[24] यताहारौ यतात्मानौ ०

देव्युवाच –

यत् प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन
मत्तस्तत् प्राप्यतां सर्वं परितुष्टा ददामि ते 10

मार्कण्डेय उवाच –

ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् 11

सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् 12

देव्युवाच –

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान्
हत्वा रिपूनस्खलितं तव तत्र भविष्यति 13

मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः
सावर्णिको नाम मनुर्भवान् भुवि भविष्यति 14

वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः
तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति 15

मार्कण्डेय उवाच –

इति दत्त्वा तयोर्देवी यथाभिलषितं वरम्
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता 16

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः । क्लीं ॐ 17

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये वरप्रदानं नाम त्रयोदशोऽध्यायः ॥

अस्य श्रीसप्तशतीरहस्यत्रयस्य, नारायण ऋषिः, अनुष्टुप् छन्दः, महाकालीमहालक्ष्मीमहासरस्वत्यो देवता, जपे विनियोगः।

# प्राधानिकं रहस्यम्

राजोवाच –

भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि 1

आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज
विधिना ब्रूहि सकलं यथावत् प्रणतस्य मे 2

ऋषिरुवाच –

इदं रहस्यं परममनाख्येयं प्रचक्षते
भक्तोऽसीति न मे किञ्चित् तवावाच्यं नराधिप 3

सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी
लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता 4

मातुलुङ्गं गदां खेटं पानपात्रं च बिभ्रती
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि 5

तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा
शून्यं तदखिलं स्वेन पूरयामास तेजसा 6

शून्यं तदखिलं लोकं विलोक्य परमेश्वरी
बभार परमं रूपं तमसा केवलेन हि 7

सा भिन्नाञ्जसङ्काशा दंष्ट्राङ्कितवरानना
विशाललोचना नारी बभूव तनुमध्यमा 8

खड्गपात्रशिरःखेटैरलङ्कृतचतुर्भुजा
कबन्धहारं शिरसा बिभ्राणा हि शिरःस्रजम् 9

सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा
नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः 10

तां प्रोवाच महलक्ष्मीस्तामसीं प्रमदोत्तमाम्
ददामि तव नामानि यानि कर्माणि तानि ते 11

महामाया महाकाली महामारी क्षुधा तृषा
निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया 12

इमानि तव नामानि प्रतिपाद्यानि कर्मभिः
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् 13

तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप
सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ 14

अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी
सा बभूव वरा नारी नामान्यस्यै च सा ददौ 15

महाविद्या महावाणी भारती वाक् सरस्वती
आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी [25] 16

अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम्
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः 17

इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम्
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ 18

ब्रह्मन् विधे विरिञ्चेति धातरित्याह तं नरम्
श्रीः पद्मे कमले लक्ष्मीत्याह माता च तां स्त्रियम् 19

महाकाली भारती च मिथुने सृजतः सह
एतयोरपि रूपाणि नामानि च वदामि ते 20

नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम्
जनयामास पुरुषं महाकाली सितां स्त्रियम् 21

---

[25] वेदगर्भा सुरेश्वरी

स रुद्रः शङ्करः स्थाणुः कपर्दी च त्रिलोचनः
त्रयी विद्या कामधेनुः सा स्त्री भाषाऽक्षरा स्वरा 22

सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप
जनयामास नामानि तयोरपि वदामि ते 23

विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः
उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा [26] 24

एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे
चक्षुष्मन्तो नु पश्यन्ति नेतरेऽतद्विदो जनाः 25

ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम्
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् 26

स्वरया सह संभूय विरिञ्चोऽण्डमजीजनत्
विभेद भगवान् रुद्रस्तद् गौर्या सह वीर्यवान् 27

अण्डमध्ये प्रधानादि कार्यजातमभून्नृप
महाभूतात्मकं सर्वं जगत् स्थावरजङ्गमम् 28

पुपोष पालयामास तल्लक्ष्म्या सह केशवः
संजहार सगत् सर्वं सह गौर्या महेश्वरः 29

---

[26] सुभगा शुभा

महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी
निराकारा च साकारा सैव नानाभिधानधृत् 30
नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित् । ॐ 31

॥ इति प्राधानिकं रहस्यं सम्पूर्णम् ॥

# वैकृतिकं रहस्यम्

ऋषिरुवाच –
त्रिगुणा तामसी देवी सत्त्विकी या त्रिधोदिता [27]
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते 1

योगनिद्रा हरेरुक्ता महाकाली तमोगुणा
मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः 2

दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा
विशालया राजमाना त्रिंशल्लोचनमालया 3

स्फुरद्दशनदंष्ट्रा सा भीमरूपाऽपि भूमिप
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियः [28] 4

---

[27] या त्वयोदिता

[28] महाश्रियाम्

खड्गबाणपदाशूलचक्रशङ्खभुशुण्डिभृत्
परिघं कार्मुकं शीर्षं निश्च्योतद् रुधिरं दधौ 5

एषा सा वैष्णवी माया महाकाली दुरत्यया
आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम् 6

सर्वदेवशरीरेभ्यो याऽविर्भूतामितप्रभा
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी 7

श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा [29] 8

सुचित्रजघना चित्रमाल्याम्बरविभूषणा
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी 9

अष्टादशभुजा पूज्या सा सहस्रभुजा सती
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् 10

अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः 11

शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः
अलङ्कृतभुजामेभिरायुधैः कमलासनाम् 12

[29] रक्तजङ्घोरुरुन्मदा

सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप
पूजयेत् सर्वलोकानां स देवानां प्रभुर्भवेत् 13

गौरीदेहात् समुद्भूता या सत्त्वैकगुणाश्रया
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी 14

दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत्
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप 15

एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति
निशुम्भमथिनी देवी शुम्भासुरनिबर्हिणी 16

इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव
उपासनं जगन्मातुः पृथगासां निशामय 17

महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती
दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् 18

विरिञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे
वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम् 19

अष्टादशभुजा मध्ये वामे चास्या दशानना
दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् 20

अष्टादशभुजा चैषा यदा पूज्या नराधिप
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा 21

कालमृत्यू च संपूज्यौ सर्वारिष्टप्रशान्तये
यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी 22

नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ
नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् 23

अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः
अष्टादशभुजा चैषा पूज्या महिषमर्दिनी 24

महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी 25

महिषान्तकरी येन पूजिता स जगत्प्रभुः
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् 26

अर्घ्यादिभिरलङ्कारैर्गन्धपुष्पैस्तथाऽक्षतैः
धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः 27

रुधिराक्तेन बलिना मांसेन सुरया नृप
[30] प्रणामाचमनीयेन चन्दनेन सुगन्धिना 28

सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः
वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् 29

पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् 30

वाहनं पुजयेद् देव्या धृतं येन चराचरम्
कुर्याच्च स्तवनं धीमांस्तस्या एकाग्रमानसः 31

ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः
एकेन वा मध्यमेन नैकेनेतरयोरिह 32

चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात्
प्रदक्षिणानमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः 33

क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः
प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषा 34

---

[30] बलिमांसादिपूजेयं विप्रवर्ज्या मयेरिता। तेषां किल सुरामांसैर्नोक्ता पूजा नृप क्वचित्॥

जुहुयात् स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः
भूयो नामपदैर्देवीं पूजयेत् सुसमाहितः [31] 35

प्रयतः प्राञ्जलिः प्रह्वः प्रणम्यारोप्य चात्मनि [32]
सुचिरं भावयेदीशां चण्डिकां तन्मयो भवेत् 36

एवं यः पूजयेद् भक्त्या प्रत्यहं परमेश्वरीम्
भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात् 37

यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम्
भस्मीकृत्यास्य पुण्यानि निर्दहेत् परमेश्वरी 38

तस्मात् पूजय भूपाल सर्वलोकमहेश्वरीम्
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि 39

॥ इति वैकृतिकं रहस्यं सम्पूर्णम् ॥

# मूर्तिरहस्यम्

ऋषिरुवाच –
नन्दा भगवती नाम या भविष्यति नन्दजा
स्तुता सा पूजिता भक्त्या वशीकुर्याज्जगत्रयम् 1

---

[31] नमोनमःपदैर्देवीं °

[32] ° प्राणानारोप्य चात्मनि

कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा
देवी कनकवर्णाभा कनकोत्तमभूषणा 2

कमलाङ्कुशपाशाब्जैरलङ्कृतचतुर्भुजा
इन्दिरा कमला लक्ष्मीः सा श्री रुक्माम्बुजासना 3

या रक्तदन्तिका नाम देवी प्रोक्ता मयाऽनघ
तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् 4

रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा
रक्तायुधा रक्तनेत्रा रक्तकेशाऽतिभीषणा 5

रक्ततीक्ष्णनखा रक्तदशना रक्तदन्तिका
पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम् 6

वसुधेव विशाला सा सुमेरुयुगलस्तनी
दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ 7

कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी
भक्तान् संपायायेद् देवी सर्वकामदुघौ स्तनौ 8

खड्गं पात्रं च मुसलं लाङ्गलं च बिभर्ति सा
आख्याता रक्तचामुण्डा देवी योगेश्वरीति सा 9

अनया व्याप्तमखिलं जगत् स्थावरजङ्गमम्
इमां यः पूजयेद् भक्त्या स व्याप्नोति चराचरम् 10

अधीते य इमं नित्यं रक्तदन्त्या वपुःस्तवम्
तं सा परिचरेद् देवी पतिं प्रियमिवाङ्गना [33] 11

शाकम्भरी नीलवर्णा नीलोत्पलविलोचना
गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी 12

सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी
मुष्टिं शिलीमुखापूर्णं कमलं कमलालया 13

पुष्पपल्लवमूलादिफलाढयं शाकसञ्चयम्
काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युभयापहम् [34] 14

कार्मुकं च स्फुरत्कान्ति बिभ्रती परमेश्वरी
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता 15

विशोका दुष्टदमनी शमनी दुरितापदाम्
उमा गौरी सती चण्डी कालिका सा च पार्वती 16

---

[33] भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात्

[34] मृत्युजरापहम्

शाकम्भरीं स्तुवन् ध्यायन् जपन् संपूजयन् नमन्
अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम् 17

भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा
विशाललोचना नारी वृत्तपीनपयोधरा 18

चन्द्रहासं च डमरुं शिरः पात्रं च बिभ्रती
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता 19

तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत्
चित्रानुलेपना देवी चित्राभरणभूषिता 20

चित्रभ्रमरपाणिः सा महामारीति गीयते
इत्येता मूर्तयो देव्या याः ख्याता वसुधाधिप 21

जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः
इदं रहस्यं परमं न वाच्यं कस्यचित् त्वया 22

व्याख्यानं दिव्यमूर्तीनामभीष्टफलदायकम्
तस्मात् सर्वप्रयत्नेन देवीं जप निरन्तरम् 23

सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि
पाठमात्रेण मन्त्राणां मुच्यते सर्वकिल्बिषैः 24

देव्या ध्यानं मया ख्यातं गुह्याद् गुह्यतरं महत्
तस्मात् सर्वप्रयत्नेन सर्वकामफलप्रदम् [35] 25

॥ इति मूर्तिरहस्यं संपूर्णम् ॥

# क्षमाप्रार्थना

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि 1

आवाहनं न जानामि न जानामि विसर्जनम्
पूजां चैव न जानामि क्षम्यतां परमेश्वरि 2

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुसेश्वरि
यत् पूजितं मया देवि परिपूर्णं तदस्तु मे 3

अपराधशतं कृत्वा जगदम्बेति चोच्चरेत्
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः 4

सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु 5

---

[35] एतस्यास्त्वं प्रसादेन सर्वमान्यो भविष्यसि। सर्वरूपमयी देवी सर्वं देवीमयं जगत्। अतोऽहं विश्वरूपां तां नमामि परमेश्वरीम्।

अज्ञानाद् विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम्
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि 6

कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि 7

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् सुरेश्वरि 8

॥ श्रीदुर्गार्पणमस्तु ॥

# आरात्रिकम्

अलिकुलकोमलबाले धृतमौक्तिकमाले
स्तनयुगनिर्जिततालें क्षीराम्बुधिबाले
काश्मीराङ्कितभाले नाशितभवजाले
लीलामर्दितकोले शरणागतपाले 1

जय देवि जय देवि जय मातः कमले
द्रुतजाम्बूनदविमले सुरनुतपदकमले ध्रु०

कमलदलायतनयने शशिनिभशुभवदने
सिंहविराजितगमने हीरावलिरदने
मुनिजनविरचितनमने कृतराक्षसकदने
कोकिलमञ्जुगदने विष्णूरःसदने 2

नागाद्यङ्कितमस्तकभुवनावनसक्ते
प्राशनभाजनखेटादिककृतकरयुक्ते
कृतकरवीरनिवासे रिपुमर्दनसक्ते
शुकनासासमनासे तारितनिजभक्ते 3

अधरविनिर्जितबिम्बे विश्वस्तुतरूपे
पृथुतरचारुनितम्बे कृतदानवकोपे
भ्रूजितमन्मथचापे निजजनहृततापे
दाजीज्योतिर्विद्वान् प्रणमति हृततापे 4

॥ आरात्रिकं संपूर्णम् ॥

# आपदुन्मूलनस्तोत्रम्

लक्ष्मीशे योगनिद्रां प्रभजति भुजगाधीशतल्पे सदर्पौ
उत्पन्नौ दानवौ तच्छ्रवणमलमयाङ्गौ मधुं कैटभं च
दृष्ट्वा भीतस्य धातुः स्तुतिभिरभिनुतां आशु तौ नाशयन्तीम्
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

युद्धे निर्जित्य दैत्यस्त्रिभुवनमखिलं यस्तदीयेषु धिष्ण्येषु
आस्थाय स्वान् विधेयान् स्वयमगमदसौ शक्रतां विक्रमेण
तं सामात्याप्तमित्रं महिषमपि निहत्यास्य मूर्धाधिरूढां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

विश्वोत्पत्तिप्रणाशस्थितिविहृतिपरे देवि घोरामरारि
त्रासात् त्रातं कुलं नः पुनरपि च महासङ्कटेष्वीदृशेषु।
आविर्भूयाः पुरस्तादिति चरणनमत्सर्वगीर्वाणवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

हन्तुं शुम्भं निशुम्भं त्रिदशगणनुतां हेमडोलां हिमाद्रौ
आरूढां व्यूढदर्पान् युधि निहतवतीं धूम्रदृक्चण्डमुण्डान्
चामुण्डाख्यां दधानां उपशमितमहारक्तबीजोपसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

ब्रह्मेशस्कन्दनारायणकिटिनरसिंहेन्द्रशक्तीः स्वभृत्याः
कृत्वा हत्वा निशुम्भं जितविबुधगणं त्रासिताशेषलोकम्
एकीभूयाथ शुम्भं रणशिरसि निहत्यास्थितां आत्तखड्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

उत्पन्ना नन्दजेति स्वयमवनितले शुम्भमन्यं निशुम्भं
भ्रामर्याख्यारुणाख्यं पुनरपि जननी दुर्गमाख्यं निहन्तुम्
भीमा शाकम्भरीति त्रुटितरिपुभटां रक्तदन्तेति जातां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

त्रैगुण्यानां गुणानां अनुसरणकलाकेलिनानावतारैः
त्रैलोक्यत्राणशीलां दनुजकुलवनीवह्निलीलां सलीलाम्
देवीं सच्चिन्मयीं तां वितरितविनमत्सत्रिवर्गापवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

सिंहारूढां त्रिनेत्रां करतलविलसच्छङ्खचक्रासिरम्यां
भक्ताभीष्टप्रदात्रीं रिपुमथनकरीं सर्वलोकैकवन्द्याम्
सर्वालङ्कारयुक्तां शशियुतमकुटां श्यामलाङ्गीं कृशाङ्गीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

त्रायस्व स्वामिनीति त्रिभुवनजननि प्रार्थना त्वय्यपार्था
पाल्यन्तेऽभ्यर्थनायां भगवति शिशवः किन्त्वनन्या जनन्याः
तत्तुभ्यं स्यान्नमस्येत्यवनतविबुधाह्लादिवीक्षाविसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय

एतं सन्तः पठन्तु स्तवमखिलविपज्जालतूलानलाभं
हृन्मोहध्वान्तभानुप्रथितमखिलसङ्कल्पकल्पद्रुकल्पम्
दौर्गं दौर्गत्यघोरातपतुहिनकरप्रख्यमंहोगजेन्द्र
श्रेणीपञ्चास्यदेश्यं विपुलभयदकालाहिताक्ष्र्यप्रभावम्

॥ इति शम् ॥